॥ श्री ॥

अथ श्री त्रिविक्रमपंडिताचार्यसुत श्री नारायणपंडिताचार्यविरचितः

॥ श्री मध्वविजयः ॥

१३. त्रयोदषः सर्गः

पृथुदर्शनमुत्थितं कृतार्थं पृथिवीभृत्प्रणतिं गृहीतवंतम् ।
निजशिष्यमुदेऽथ सह्यमाप्तं पुरुषः कश्चिदुपाययौ कदाचित् ॥ १३.१ ॥

भगवानिह नः स्वकिंकराणां अचिरेणाऽव्रजतादनुग्रहाय ।
इति कार्यचिकीर्षयाऽऽर्थयत् त्वां नृप इत्यभ्यधितैष तं प्रणम्य ॥ १३.२ ॥

अथ माघवतीमपास्य काष्ठां व्रजता प्रैधिततेजसा प्रतीचीम् ।
परिशोधयता स्वपादसंगात् पृथिवीं प्राज्ञदिवाकरेण रेजे ॥ १३.३ ॥

अशुभानपहाय मायिजुष्टान् अधमाद्रीनिव गोत्रनिम्नगौघैः ।
सुजनैस्तरसाऽभिगम्यमानः परमस्नेहतया क्रमप्रसन्नैः ॥ १३.४ ॥

सुमनःफलशोभिनोऽत्र पुंसो नमयन् गोभिरनोकहानिवोच्चान् ।
अपि भंगमुपानयन्ननम्रान् दृढभावादपरानवार्यवीर्यः ॥ १३.५ ॥

गमनोत्सवविस्मितैर्निषेव्यो विविधैर्जनपदैर्जनैरजस्रम् ।
परिसृत्वरकीर्तिरार्तिमुक्त्यै पुरुषैर्दूरभुवश्च गम्यमानः ॥ १३.६ ॥

अमरैरमरानुगैर्मुनींद्रैः अपरोक्षाविषयैश्च सेव्यमानः ।
हरिपादसरोजसंगसारो भुवने पावनपावनो निकामम् ॥ १३.७ ॥

अयमप्रतिवारणः प्रयाणे परमानंदसुतीर्थसूरिराजः ।
विबभावतिवेलमच्चरूपः सुरसिंधोरिव संततप्रवाह ःः ॥ १३.८ ॥

समयेन गतोऽमहीयसाऽसौ विषयं स्तंभपदोपसर्जनाख्यम् ।
मदनाधिपतेः सुधाम धाम प्रविवेशाखिललोकवंदनीयम् ॥ १३.९ ॥

क्षणदामिह तावदूषिवांसं विहिताहर्मुखयोग्ययोगमेनम् ।
गमनोद्यमलक्षणैरजानन् गमनायोद्यतमाशु शिष्यसंघाः ॥ १३.१० ॥

पुरतो विसृताः समाधिशुद्ध्यै यतयस्तत्र पटीः कषायवेषाः ।
सहसोदहरन् स्वयोग्यमुद्रायुतदंडादिकधारणोद्यमेन ॥ १३.११ ॥

अवधार्य विशेषकारिशंखप्रकटांकान् सुधिया गतार्द्रभावान् ।
लसिता तुळसीस्रगस्य कंठे हरिनिर्माल्यतयोचिता न्यधायि ॥ १३.१२ ॥

यतधीर्गुरुचक्रिमूर्तिपूर्णं यतनिश्वासवचा विशोध्य पाणी ।
गुणकुंडलमंडितं विमानं गुणबंधं कवचावृतं बभार ॥ १३.१३ ॥

सकमंडलुमंडलावलंबं स्वयमेवालघुपुस्तकादिभारम् ।
युवशिष्यगणो दधे नयत्नात् हि दाक्ष्यस्य गुणोऽपरोऽस्ति ॥ १३.१४ ॥

अतिसंभ्रमतः परिभ्रमंतं भरदामानवलोकिनं चिराय ।
अनुयोगपरं मुहुः प्रमत्तं जहसुर्नूतनशिष्यमत्र केचित् ॥ १३.१५ ॥

अथ तत्क्षणघट्टितोरुघंटाघननादव्यपदेशतः परेण ।
अमितप्रमतिः प्रचोदितोऽसौ इति निर्यत्सु निजेषु निर्जगाम ॥ १३.१६ ॥

धृतमातपवारणं वरेण्यं व्रतिराजं तमुपर्युपर्युदारम् ।
उदयन्मिहिरोपरिष्ठपूर्णद्विजराजश्रियमाययावभूताम् ॥ १३.१७ ॥

भुवनत्रयधारिणं मुकुंदं दधदंतः स दधे गुरुः स्वयं च ।
अपि केनचिदित्यदो न चित्रं ननु स प्राणपतिर्बभार तं च ॥ १३.१८ ॥

यतयो गृहिणोऽथ वर्णिमुख्याः श्रुतिगास्त्यक्तनिषिद्धकाम्यभावाः ।
इह मूर्तिधरा इव स्वधर्माः शतसंख्याः शतसंख्यमन्वगच्चन् ॥ १३.१९ ॥

परिवारजना न मार्गदुःखं प्रययुः पूरुषरत्नमीक्षमाणाः ।

इति नाद्भुतमस्य हि प्रयांति स्मृतिमात्राद् भविनो भवापवर्गम् ॥ १३.२० ॥

मदनेश्वरवल्लभप्रदेशे प्रभुमायांतमथाभ्यपद्यत द्राक् ।
जयसिंह इमं नृसिंहवर्यः शुभधीः स्तंभविशिष्टसिंहनामा ॥ १३.२१ ॥

अवतीर्य पुरैव वाहनात् स्वाद् अपि मार्गादपसार्य सैनिकान् सः ।
सह कैश्चन भूसुरैरवाप्तः त्रिजगत्पूज्यपदांतिके ननाम ॥ १३.२२ ॥

पृथिवीपतिनाऽनुगम्यमानो विनयाद् भक्तिरसार्द्रमानसेन ।
अचिरेण स विष्णुमंगलस्य प्रययावायतनोत्तमस्य पार्श्वम् ॥ १३.२३ ॥

नरदेवदिदृक्षया समेता उभयग्रामजना जनाः परे च ।
उपयांतमनंतमानसं तं मुहुरैक्षंत कुतूहलाब्धिमग्नाः ॥ १३.२४ ॥

पुरतो मधुरस्वनैर्वदद्भिः स्वकृताः कर्णसुखा मुकुंदगाथाः ।
धृतपंकजबीजचक्रचिह्नैः कृत नृत्तैश्चतुरैर्निषेव्यमाणम् ॥ १३.२५ ॥

कलितांजलिना स्फुटानुयातं जनसंबाधसहेन भूमिभर्त्रा ।
करुणाविषयं चिकीर्षुणा स्वं व्रजता किंकरतामकैतवेन ॥ १३.२६ ॥

इदमित्थमितीक्षणैर्नराणां अपरिच्छेद्यमहिष्ठधामरूपम् ।
अधिकं धरणीमलं चिकीर्षुं स्फुटमुद्यंतमिव द्युनाथमन्यम् ॥ १३.२७ ॥

अशनैः शनकैरिवाऽव्रजंतं युवसिंहप्रवरप्रगल्भयानम् ।
अतिपाटलपादपल्लवाभ्यां अवनीं पावनतामलं नयंतम् ॥ १३.२८ ॥

नखनिर्जितपद्मरागरागं वरकूर्मप्रपदं निगूढगुल्फम् ।
सुरवर्यकराग्रसेव्यजंघं द्विरदोदारकरोपमोरुयुग्मम् ॥ १३.२९ ॥

शुभशुद्धनितंबबिंबराजन्नवकौशेयविशेषबाह्यवस्त्रम् ।
तनुकुक्षिगळाळिकेषु रेखात्रितयेन प्रकटेन शोभमानम् ॥ १३.३० ॥

मृदुसूक्ष्मघनारुणाविकाच्छप्रकटप्रावरणेन भासमानम् ।
अतिनूतनतिग्मभानुभासां निकरेणेव सुवर्णसानुमंतम् ॥ १३.३१ ॥

पृथुवक्षसमुन्नतांसभित्तिं गुरुवृत्तायतहृद्यबाहुदंडम् ।
परमारुणपाणिपल्लवांतः स्फुरितोर्ध्वध्वजलांछनादिमंतम् ॥ १३.३२ ॥

परिपूर्णशशांकबिंबशंकाविषयं प्राक् सहसाऽवलोकनेन ।
अकळंकतया परं विविक्तं वदनं बिभ्रतमच्छविभ्रमाब्धिम् ॥ १३.३३ ॥

अतिसुंदरमंदहासराजन्नवकुंदाभरदं शुभारुणोष्ठम् ।
कमळायतलोचनावलोकैः अपि लोकान् सकलान् प्रहर्षयंतम् ॥ १३.३४ ॥

अतिभासुरकर्णभासितश्रीतुळसीगुच्छमतुच्छकांतिगंडम् ।
भुवनत्रयभूत्यभूतिदाने चतुरभ्रूवरविभ्रमं सुमौलिम् ॥ १३.३५ ॥

सकलावयवान् स्फुटं मिमानाः प्रतिमालक्षणलक्षणाय लक्ष्यम् ।
चतुरा विदधुर्यदीयगात्रं स सुलक्ष्मेत्यधुना निगद्यते नो ॥ १३.३६ ॥

अतिलोलदृशां समीक्षितुं स्वं जनसंबाधभयेन दूरभाजाम् ।
समदर्शयदूर्ध्वमोरसोऽसौ दययैवोरुजनौघमध्यगोऽपि ॥ १३.३७ ॥

सविकासदृशां कृतांजलीनां जनतानां परमादरान्नतानाम् ।
वलयेन वृतः प्रियं मुरारेः प्रविवेशाऽयतनं प्रबर्हबोधः ॥ १३.३८ ॥

विविधप्रभुमध्यसन्निषण्णो नरदेवेन समं स गूढदेवः ।
विबभावुडुराडिवोडुमध्ये सह मह्यास्तनयेन पूर्णबिंबः ॥ १३.३९ ॥

अवदत् स कथां रथांगपाणेः भगवान् भागवते भवाप हंत्रीम् ।
अनुकूलगुणस्वरादिभाजा निजशिष्यप्रवरेण वाच्यमाने ॥ १३.४० ॥

कथनं तदुदारधैर्यसारं मधुरं पुष्कलभाववत् प्रसन्नम्।
विदुषोऽविदुषोऽपि शृण्वतोऽलं व्यधिताऽनंदरसांबुधौ निमग्नान् ॥ १३.४१ ॥

गमनासनसंकथादिलीलाः स्मृतिमात्रेण भवापवर्गदात्रीः ।
कथमप्यमराः प्रपंचयेयुः ननु मध्वस्य न मादृशोऽल्पबोधाः ॥ १३.४२ ॥

सुतपःकवितादिसद्गुणानां लिकुचानां कुलजोऽंगिरोन्वयानाम् ।
अभवद् गुहनामको विपश्चित् कविवर्योऽखिलवादिवंदनीयः ॥ १३.४३ ॥

दयिताऽस्य सती गुणानुरूपा विधिवीर्येण मुहुर्मृतप्रजाऽपि ।
अभजद्भुवनप्रभू हरीशौ सुतकामा वसुदेवसूनुभक्ता ॥ १३.४४ ॥

परमेश्वरयोः प्रसादयोगात् सुतरत्नं तदसूत सूरिपत्नी ।
परिषत्पदपट्टनेषु नार्घो विविदे यस्य समः परीक्षकाग्र्यैः ॥ १३.४५ ॥

वदनेंदुमवेक्ष्य नंदनस्य स्वकुलोत्तारणदक्षलक्षणस्य ।
कृतकृत्यतया क्रियाः प्रकुर्वन् कविराख्यादुचितां त्रिविक्रमाख्याम् ॥ १३.४६ ॥

कळभाषण ऐव सूरिपोतः कविरासीदनवद्यपद्यवादी ।
अवभाति ननु प्रभाप्रभावी भगवान् बालतरोऽपि तिग्मभानुः ॥ १३.४७ ॥

सकलांगयुतावभातशाखः समये प्राप्त उदारपक्षिसेव्यः ।
स ससर्ज सदध्वगोपकृत्यै लिकुचः काव्यफलं रसाभिरामम् ॥ १३.४८ ॥

प्रतिपादितमात्मना यथार्थं पृथुमायासमयस्य दुर्घटत्वम् ।
स्वगुरौ परिहर्तुमक्षमेऽपि श्रुतवांस्तं स वयस्यबोधितोऽलम् ॥ १३.४९ ॥

भगवत्युदिते सगोविलासे वटुभावं त्यजति त्रिविक्रमाख्ये ।
अपि भानुपुरस्सराः समस्ताः प्रययुः कीटमणिप्रभत्वमाषु ॥ १३.५० ॥

अतिदक्षमतिं सपादलक्षे समये मायिजनस्य युक्तिशूरम् ।

महितं हि महीतळे महिम्ना जनको नंदनमब्रवीदुपांशु ॥ १३.५१ ॥

शृणु वाचमिमां विचारितार्थां न कलौ निर्गुणभावना सुखाय ।
इति गौणविमुक्तये गुणाढ्यं भज देवं वसुदेवसूनुमेव ॥ १३.५२ ॥

इति तातवचो निशम्य किंचित् तरळात्माऽपि विचार्य शास्त्रसारम्।
परमेव स पारमारुरुक्षुः विगुणोऽपास्तिमुपाशृणोत् परेभ्यः ॥ १३.५३ ॥

निजधर्मरतो गृहिप्रबर्हः कलिकालाकुलितांतरोऽपि हंत ।
नितरां निषितात्मना निसर्गात् स्फुटमालोचयदित्यसौ कदाचित् ॥ १३.५४ ॥

रचितं ननु सूत्रमत्र मानं विदुषा सत्यवतीसुतेन साक्षात् ।
अपरस्परसंगतानि भाष्याण्यपि सर्वाणि न मानतां व्रजेयुः ॥ १३.५५ ॥

यदि तेषु निराग्रहांतराः स्मः सुघटं नोपलभामहे हि किंचित् ।
न तथाऽपि परंपरोपयातं न पठामः प्रणयेन शांकरीयम् ॥ १३.५६ ॥

घटनोपनिषत्सु नाल्पबुद्धेः सुघटेत्यभ्युपगम्य चिंतयामः ।
न विमुक्तिमुपैति कोऽपि मुक्त्वा समयोक्तामिह यामिमामुपास्तिम् ॥ १३.५७ ॥

विततः सुखसच्चिदद्वयात्मा समुपास्यो विहितो हि तत्त्वविद्भिः ।
स च नावयवी निरूप्यते चेद् द्युतिमात्रं च न हीत्यदो रहस्यम् ॥ १३.५८ ॥

यदि चेदृगुपास्यतेऽस्य रूपं तिमिरत्वेन विभाति पारिशेष्यात् ।
फलमप्यथ मुक्तिरीदृशी स्याद् इति नो नैव धिनोत्युपास्तिरेषा ॥ १३.५९ ॥

अथ वेदपुराणभारतानि स्वयमालोच्य यथावबोधमत्र ।
गुणवंतमुपास्महे मुकुंदं स्मृतिधर्मान् स्फुटमाचरंत ऐव ।१३.६० ॥

अवधार्य यदेतिकार्यमार्यः स विवेकादुपचक्रमे विधातुम्।
परिपूर्णमतेर्जगत्सु कीर्तिं परिपूर्णामश्रृणोत् तदा विशुद्धाम् ॥ १३.६१ ॥

विहिनस्ति हि नो जनोऽतिवाग्मी समयं कोऽपि परंपरोपयातम् ।
क्षिप तं त्वमुदारयुक्तिशूरो न परे तत्र समर्थतां व्रजेयुः ॥ १३.६२ ॥

तव वेदनदीर्विगाह्य भूयः समयांभोधिषु कुर्वतो विहारम् ।
नवकाव्यरसप्रियस्य वादिद्विरदेंद्र प्रतिवारणो न जज्ञे ॥ १३.६३ ॥

उपयाहि यशः शशांकगौरं निजयूथस्य भयं निराकुरु त्वम् ।
अधुना विधिनोपपादितं तं प्रतिवादिप्रतिवारणं निवार्य ॥ १३.६४ ॥

इति मायिजनेन तत्रतत्र स्वजनत्वेन स तावदर्थ्यमानः ।
अनुकूलवचा महिष्ठमानो मनसा संशयमाप संशयच्छित् ॥ १३.६५ ॥

शितमध्ववचः सृणिप्रयोक्तॄन् पुरुषानेष विषादयन् कवीभः ।
विविधोत्तरधूळिपातनेन प्रतिघेनाधिकमंधयांचकार ॥ १३.६६ ॥

क्षणदासु विचक्षणः स वीक्ष्य प्रचुरप्रज्ञमनोज्ञशास्त्रसारम् ।
अपराविदितः प्रसादगर्भं विदधे विस्मयमांतरं महांतम् ॥ १३.६७ ॥

विदितवान् व्यवहृत्य सुदर्शनं बहळबोधमवेक्ष्य स निश्चयात् ।
अपि न तस्य मतं सहसाऽऽददे ननु विमृश्य कृती कुरुतेऽखिलम् ॥ १३.६८ ॥

तं विश्णुमंगलगतं बहळप्रबोधं प्राप्याभ्यवंदत तदाऽयुगविक्रमार्यः।
आनंददं स चतुराननहासलक्ष्म्या तत्त्वं प्रवेत्तुममरेंद्र इवाब्जयोनिम् ॥ १३.६९ ॥

॥ इति श्रीमत्कविकुलतिलक त्रिविक्रमपंडिताचार्यसुत
श्रीनारायणपंडिताचार्यविरचिते श्रीमध्वविजये
आनंदांकिते त्रयोदशः सर्गः ॥